

॥ सौन्दर्य लहरी - श्री शंकराचार्य विरचितम् ॥

Saundarya Lahari – Sri Shankaracharya

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चे देवं देवो न खलु कुशलः स्पन्दितुं अपि ।
अतस् त्वां आराध्यां हरि हर विरिञ्चादिभिर् अपि
प्रणन्तुं स्तोतुं वा कथं अकृत पुण्यः प्रभवति ॥ १ ॥

तनीयांसं पांसुं तव चरण पङ्केरुह भवं
विरिञ्चिः सञ्चिन्वन् विरचयति लोकानविकलम् ।
बहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुद्यैनं भजति भसितोद् धूलन विधिम् ॥ २ ॥

अविद्यानां अन्तस् तिमिर मिहिर द्वीप नगरी
जडानां चैतन्य स्तबक मकरन्द स्रुतिझरी ।
दरिद्राणां चिन्तामणि गुण निका जन्म जलधौ
निमग्नानां दंष्ट्रा मुररिपु वराहस्य भवति ॥ ३ ॥

त्वदन्यः पाणिभ्यां अभय वरदो दैवत गणः
त्वमेका नैवासि प्रकटित वराभीत्यभिनया ।
भयात् त्रातुं दातुं फलमपि च वाञ्चास मधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ ॥ ४ ॥

हरिस् त्वां आराध्य प्रणत जन सौभाग्य जननीं
पुरा नारी भूत्वा पुररिपुमपि क्षोभ मनयत् ।
स्मरो ऽ पि त्वां नत्वा रति नयन लेह्येन वपुषा
मुनीनां अप्यन्तः प्रभवति हि मोहाय महताम् ॥ ५ ॥

धनुः पौष्पं मौर्वी मधुकर मयी पञ्च विशिखाः
वसन्तः सामन्तो मलय मरुदायोधनरथः ।
तथा ऽ प्येकः सर्वं हिमगिरि सुते कामपि कृपाम्
अपाङ्गात्ते लब्ध्वा जगदिदं अनङ्गो विजयते ॥ ६ ॥

क्वणत् काञ्ची दामा करि कलभ कुम्भ स्तन नता
परिक्षीणा मध्ये परिणत शरच्चन्द्र वदना ।

धनुर् बाणान् पाशं सृणिमपि दधाना करतलैः
　　पुरस्ताद् आस्तां नः पुरमथितुः आहो पुरुषिका ॥ ७ ॥

सुधा सिन्धोर् मध्ये सुरविटपिवाटी परिवृते
　　मणिद्वीपे नीपो पवन वति चिन्तामणि गृहे ।
शिवाकारे मञ्चे परमशिव पर्यङ्क निलयां
　　भजन्ति त्वां धन्याः कतिचन चिदानन्द लहरीम् ॥ ८ ॥

महीं मूलाधारे कमपि मणिपूरे हुतवहं
　　स्थितं स्वाधिष्ठाने हृदि मरुत माकाश मुपरि ।
मनो ऽ पि भ्रूमध्ये सकलमपि भित्त्वा कुल पथं
　　सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥ ९ ॥

सुधा धारा सारैः चरण युगळान्तर् विगळितैः
　　प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नाय महसः ।
अवाप्य स्वां भूमिं भुजग निभं अध्युष्ट वलयं
　　स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ॥ १० ॥

चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरपि
　　प्रभिन्नाभिः शंभोः नवभिरपि मूल प्रकृतिभिः ।
चतुश् चत्वारिं शद् वसुदल कलाश्र त्रिवलय
　　त्रिरेखाभिः सार्धं तव शरण कोणाः परिणताः ॥ ११ ॥

त्वदीयं सौन्दर्यं तुहिन गिरि कन्ये तुलयितुं
　　कवीन्द्राः कल्पन्ते कथमपि विरिञ्चि प्रभृतयः ।
यदा लोकौत्सुक्यात् अमर ललना यान्ति मनसा
　　तपोभिः दुष्प्रापामपि गिरिश सायुज्य पदवीम् ॥ १२ ॥

नरं वर्षीयांसं नयन विरसं नर्मसु जडं
　　तवा ऽ पाङ्गा लोके पतितं अनुधावन्ति शतशः ।
गलद्वेणी बन्धाः कुच कलश विस्रस्त सिचया
　　हटात् त्रुट्यत् काञ्च्यः विगळित दुकूलाः युवतयः ॥ १३ ॥

क्षितौ षट्पञ्चाशद् द्विसमधिक पञ्चाशद् उदके
हुताशे द्वाषष्टिश् चतुरधिक पञ्चाश दनिले।
दिवि द्विष्षट् त्रिंशत् मनसि च चतुष् षष्टिरिति ये
मयूखाः तेषां अप्युपरि तव पादाम्बुज युगम्॥ १४ ॥

शरज् ज्योत्स्ना शुद्धां शशियुत जटाजूट मकुटां
वर त्रास त्राण स्फटिक घटिका पुस्तक कराम्।
सकृन्न त्वा नत्वा कथमिव सतां सन्निदधते
मधु क्षीर द्राक्षा मधुरि मधुरीणाः फणितयः॥ १५ ॥

कवीन्द्राणां चेतः कमल वन बालातप रुचिं
भजन्ते ये सन्तः कतिचित् अरुणामेव भवतीम्।
विरिञ्चि प्रेयस्याः तरुण तर शृङ्गार लहरी
गभीराभिः वाग्भिः विदधति सतां रञ्जनममी॥ १६ ॥

सवित्रीभिर् वाचां शशि मणि शिला भङ्ग रुचिभिः
वशिन्या ऽ द्याभिः त्वां सह जननि संचिन्तयति यः।
स कर्ता काव्यानां भवति महतां भङ्गि रुचिभिः
वचोभिः वाग्देवी वदन कमलामोद मधुरैः॥ १७ ॥

तनुच्छायाभिस्ते तरुण तरणि श्रीसरणिभिः
दिवं सर्वां उर्वीं अरुणिम निमग्नां स्मरति यः।
भवन्त्यस्य त्रस्यद्वन हरिण शालीन नयनाः
सहोर्वश्या वश्याः कति कति न गीर्वाण गणिकाः॥ १८ ॥

मुखं बिन्दुं कृत्वा कुच युगं अधस्तस्य तदधः
हरार्धं ध्यायेद्यो हर महिषि ते मन्मथ कलाम्।
स सद्यः संक्षोभं नयति वनिता इत्यति लघु
त्रिलोकीमप्याशु भ्रमयति रवीन्दु स्तन युगाम्॥ १९ ॥

किरन्तीं अङ्गेभ्यः किरण निकुरम्बा ऽ मृत रसं
हृदि त्वा माधत्ते हिमकर शिला मूर्तिं इव यः।

स सर्पाणां दर्पं शमयति शकुन्ताधिप इव
ज्वर प्लुष्ठान् दृष्ट्या सुखयति सुधा धारसिरया ॥ २० ॥

तटिल्लेखा तन्वीं तपन शशि वैश्वानर मयीं
निषण्णां षण्णां अप्युपरि कमलानां तव कलाम् ।
महापद्मा ऽ टव्यां मृदित मलमायेन मनसा
महान्तः पश्यन्तो दधति परमानन्द लहरीम् ॥ २१ ॥

भवानी त्वं दासे मयि वितर दृष्टिं सकरुणाम्
इति स्तोतुं वाञ्चन् कथयति भवानी त्वमिति यः ।
तदैव त्वं तस्मै दिशसि निज सायुज्य पदवीं
मुकुन्द ब्रह्मेन्द्र स्फुट मुकुट नीराजित पदाम् ॥ २२ ॥

त्वया हृत्वा वामं वपुर परितृप्तेन मनसा
शरीरा ऽ र्धं शम्भोर् अपरमपि शङ्के हृतमभूत् ।
यदेतत् त्वद् रूपं सकल मरुणाभं त्रिनयनं
कुचाभ्यामानम्रं कुटिल शशि चूडाल मुकुटम् ॥ २३ ॥

जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस् कुर्वन् एतत् स्वमपि वपुरीश स्तिरयति ।
सदा पूर्वः सर्वं तदिदं अनुगृह्णाति च शिवः
तवाज्ञां आलम्ब्य क्षण चलितयोः भ्रूलतिकयोः ॥ २४ ॥

त्रयाणां देवानां त्रिगुण जनितानां तव शिवे
भवेत् पूजा पूजा तव चरणयोर् या विरचिता ।
तथा हि त्वत् पादोद् वहन मणि पीठस्य निकटे
स्थिता ह्येते शश्वन् मुकुलित करोत्तंस मकुटाः ॥ २५ ॥

विरिञ्चिः पञ्चत्वं व्रजति हरिर् आप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनम् ।
वितन्द्री माहेन्द्री विततिरपि संमीलत दृशा
महासंहारे ऽ स्मिन् विहरति सति त्वत् पतिरसौ ॥ २६ ॥

जपो जल्पः शिल्पं सकलं अपि मुद्रा विरचना
गतिः प्रादक्षिण्य क्रमणं अशनाद्या ऽ हुति विधिः ।
प्रणामः संवेशः सुखमखिलं आत्मा ऽ र्पण दृशा
सपर्या पर्यायस् तव भवतु यन्मे विलसितम् ॥ २७ ॥

सुधामपि आस्वाद्य प्रतिभय जरा मृत्यु हरिणीम्
विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः ।
करालं यत्क्ष्वेळं कबलितवतः कालकलना
न शंभोः तन्मूलं तव जननि ताटङ्क महिमा ॥ २८ ॥

किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कटोरे कोटीरे स्खलसि जहि जंभारि मकुटम् ।
प्रणम्रेष्वेतेषु प्रसभ मुपया तस्य भवनम्
भवस्याभ्युत्थाने तव परिजनोक्तिः विजयते ॥ २९ ॥

स्वदेहोद् भूताभिः घृणिभिः अणिमाद्याभिः अभितः
निषेव्ये नित्ये त्वामहं इति सदा भावयति यः ।
किमा ऽ श्चर्यं तस्य त्रिनयन समृद्धिं तृणयतो
महासंवर्ता ऽ ग्निः विरचयति नीराजन विधिम् ॥ ३० ॥

चतुः षष्ट्या तन्त्रैः सकलं अतिसन्धाय भुवनं
स्थितस् तत्तत् सिद्धि प्रसव परतन्त्रैः पशुपतिः ।
पुनस् त्वन् निर्बन्धा दखिल पुरुषार्थैक घटना
स्वतन्त्रं ते तन्त्रं क्षितितलं अवातीतर दिदम् ॥ ३१ ॥

शिवः शक्तिः कामः क्षिति रथ रविः शीत किरणः
स्मरो हंसः शक्रः तदनु च परा मार हरयः ।
अमी हृल्लेखाभिः तिसृभिः अवसानेषु घटिताः
भजन्ते वर्णास्ते तव जननि नामावयवताम् ॥ ३२ ॥

स्मरं योनिं लक्ष्मीं त्रितय मिदमादौ तव मनोः
निधायैके नित्ये निरवधि महाभोग रसिकाः ।

भजन्ति त्वां चिन्तामणि गुण निबद्धा ऽ क्ष वलयाः
शिवा ऽ ग्नौ जुह्वन्तः सुरभि घृत धाराहुति शतैः ॥ ३३ ॥

शरीरं त्वं शंभोः शशि मिहिर वक्षोरुह युगं
तवात्मानं मन्ये भगवति नवात्मान मनघम् ।
अतः शेषः शेषीत्ययं उभय साधारण तया
स्थितः संबन्धो वां समरस परानन्द परयोः ॥ ३४ ॥

मनस् त्वं व्योम त्वं मरुदसि मरुत् सारथिरसि
त्वमापः त्वं भूमिः त्वयि परिणतायां न हि परम् ।
त्वमेव स्वात्मानं परिणमयितुं विश्व वपुषा
चिदानन्दाकारं शिव युवति भावेन बिभृषे ॥ ३५ ॥

तवाज्ञा चक्रस्थं तपन शशि कोटि द्युति धरं
परं शंभुं वन्दे परिमिलित पार्श्वं परचिता ।
यमाराध्यन् भक्त्या रवि शशि शुचीनां अविषये
निरालोके ऽ लोके निवसति हि भालोक भुवने ॥ ३६ ॥

विशुद्धौ ते शुद्ध स्फटिक विशदं व्योम जनकम्
शिवं सेवे देवीमपि शिव समान व्यवसिताम् ।
ययोः कान्त्या यान्त्याः शशि किरण सारूप्य सरणेः
विधूतान्तर् ध्वान्ता विलसति चकोरीव जगती ॥ ३७ ॥

समुन्मीलत् संवित् कमल मकरन्दैक रसिकम्
भजे हंस द्वन्द्वं किमपि महतां मानस चरम् ।
यदा लाभात् अष्टादश गुणित विद्या परिणतिः
यदादत्ते दोषात् गुणमखिलं अद्भ्यः पय इव ॥ ३८ ॥

तव स्वाधिष्ठाने हुतवहं अधिष्ठाय निरतम्
तमीडे संवर्तं जननि महतीं तां च समयाम् ।
यदालोके लोकान् दहति महसि क्रोध कलिते
दयार्द्रा या दृष्टिः शिशिरं उपचारं रचयति ॥ ३९ ॥

तटित्त्वन्तं शक्त्या तिमिर परिपन्थि स्फुरणया
स्फुरन् नानारत्ना ऽ भरण परिणद्धेन्द्र धनुषम् ।
तव श्यामं मेघं कमपि मणिपूरैक शरणं
निषेवे वर्षन्तं हरमिहिर तप्तं त्रिभुवनम् ॥ ४० ॥

तवाधारे मूले सह समयया लास्य परया
नवात्मानं मन्ये नवरस महाताण्डव नटम् ।
उभाभ्यां एताभ्यां उदय विधिं उद्दिश्य दयया
सनाथाभ्यां जज्ञे जनक जननीमत् जगदिदम् ॥ ४१ ॥

गतैर् माणिक्यत्वं गगन मणिभिः सान्द्र घटितं
किरीटं ते हैमं हिमगिरि सुते कीर्तयति यः ।
स नीडे यच्छायाश् छुरण शबलं चन्द्र शकलं
धनुः शौनासीरं किमिति न निबध्नाति धिषणाम् ॥ ४२ ॥

धुनोतु ध्वान्तं नस्तुलित दलितेन्दीवर वनम्
घन स्निग्धश् लक्ष्णं चिकुर निकुरम्बं तव शिवे ।
यदीयं सौरभ्यं सहजं उपलब्धुं सुमनसो
वसन्त्यस्मिन् मन्ये वलमथन वाटीविटपिनाम् ॥ ४३ ॥

तनोतु क्षेमं नस्तव वदन सौन्दर्य लहरी
परीवाहः स्रोतः सरणिरिव सीमन्त सरणिः ।
वहन्ती सुन्दूरं प्रबल कबरी भार तिमिर
द्विषां बृन्दैः बन्दीकृतं इव नवीना ऽ र्क किरणम् ॥ ४४ ॥

अरालैः स्वाभाव्यात् अलिकलभस श्रीभिः अलकैः
परीतं ते वक्त्रं परिहसति पङ्केरुह रुचिम् ।
दरस्मेरे यस्मिन् दशन रुचि किञ्जल्क रुचिरे
सुगन्धौ माद्यन्ति स्मर दहन चक्षुः मधुलिहः ॥ ४५ ॥

ललाटं लावण्य द्युति विमलं आभाति तव यत्
द्वितीयं तन्मन्ये मकुट घटितं चन्द्र शकलम् ।

विपर्या सन्यासात् उभयमपि संभूय च मिथः
सुधालेपस्यूतिः परिणमति राका हिमकरः ॥ ४६ ॥

भ्रुवौ भुग्ने किंचिद् भुवन भय भङ्गव्य सनिनि
त्वदीये नेत्राभ्यां मधुकर रुचिभ्यां धृत गुणम् ।
धनुर् मन्ये सव्येतरकर गृहीतं रतिपतेः
प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तर मुमे ॥ ४७ ॥

अहः सूते सव्यं तव नयनं अर्का ऽ त्म कतया
त्रियामां वामं ते सृजति रजनी नायक तया ।
तृतीया ते दृष्टिः दरदलित हेमाम्बुज रुचिः
समाधत्ते सन्ध्यां दिवस निशयोः अन्तरचरीम् ॥ ४८ ॥

विशाला कल्याणी स्फुट रुचिः अयोध्या कुवलयैः
कृपाधारा धारा किमपि मधुरा आभोगवतिका ।
अवन्ती दृष्टिस्ते बहु नगर विस्तार विजया
ध्रुवं तत्तन् नाम व्यवहरण योग्या विजयते ॥ ४९ ॥

कवीनां सन्दर्भ स्तबक मकरन्दैक रसिकम्
कटक्ष व्याक्षेप भ्रमर कलभौ कर्ण युगलम् ।
अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वाद तरलौ
असूया संसर्गात् अलिक नयनं किञ्चिदरुणम् ॥ ५० ॥

शिवे शृङ्गारार्द्रा तदितरजने कुत्सनपरा
सरोषा गङ्गायां गिरिश चरिते विस्मयवती ।
हराहिभ्यो भीता सरसिरुह सौभाग्य जननी
सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा ॥ ५१ ॥

गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती
पुरां भेत्तुः चित्त प्रशम रस विद्रावण फले ।
इमे नेत्रे गोत्राधरपति कुलोत्तं सकलिके
तव आकर्णा ऽ कृष्ठ स्मरशर विलासं कलयतः ॥ ५२ ॥

विभक्त त्रैवर्ण्यं व्यतिकरित लीलाञ्जनतया
विभाति त्वन्नेत्र त्रितयमिदं ईशानदयिते ।
पुनः स्रष्टुं देवान् द्रुहिण हरिरुद्रान् उपरतान्
रजः सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिव ॥ ५३ ॥

पवित्री कर्तुं नः पशुपति पराधीन हृदये
दया मित्रैर् नेत्रैः अरुण धवल श्याम रुचिभिः ।
नदः शोणो गङ्गा तपन तनयेति ध्रुवममुं
त्रयाणां तीर्थानां उपनयसि संभेदमनघम् ॥ ५४ ॥

निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहुः सन्तो धरणिधर राजन्य तनये ।
त्वदुन्मेषाज्जातं जगदिदं अशेषं प्रलयतः
परित्रातुं शङ्के परिहृद निमेषास्तव दृशः ॥ ५५ ॥

तवापर्णे कर्णे जप नयन पैशुन्य चकिता
निलीयन्ते तोये नियतम निमेषाः शफरिकाः ।
इयं च श्रीर्बद्धच्छद पुटक वाटं कुवलयम्
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥ ५६ ॥

दृशा द्राघीयस्या दरदलित नीलोत्पल रुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकर निपातो हिमकरः ॥ ५७ ॥

अरालं ते पाली युगलं अगराजन्य तनये
न केषामाधत्ते कुसुमशर कोदण्ड कुतुकम् ।
तिरश्चीनो यत्र श्रवण पथ मुल्लङ्घ्य विलसन्
अपाङ्गव्यासङ्गो दिशति शरसन्धान धिषणाम् ॥ ५८ ॥

स्फुरद् गण्डा भोग प्रतिफलित ताटङ्क युगलम्
चतुश्चक्रं मन्ये तव मुखमिदं मन्मथ रथम् ।

यमारुह्य द्रुह्यति अवनिरथम् अर्केन्दु चरणं
महावीरो मारः प्रमथ पतये सज्जितवते ॥ ५९ ॥

सरस्वत्याः सूक्तीः अमृत लहरी कौशल हरीः
पिबन्त्याः शर्वाणि श्रवण चुलुकाभ्यां अविरलम् ।
चमत्कार श्लाघा चलित शिरसः कुण्डल गणो
झणत्कारैस् तारैः प्रतिवचन माचष्ट इव ते ॥ ६० ॥

असौ नासावंशः तुहिन गिरि वंश ध्वजपटि
त्वदीयो नेदीयः फलतु फलं अस्माकं उचितम् ।
वहन्त्यन्तर् मुक्ताः शिशिर कर निश्वास गलितम्
समृद्ध्या यत्तासां बहिरपि स मुक्तामणि धरः ॥ ६१ ॥

प्रकृत्या रक्तायास्तव सुदति दन्तच्छद रुचेः
प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुम लता ।
न बिम्बं तद् बिम्ब प्रतिफल नरागात् अरुणितम्
तुलां अध्यारोढुं कथमिव न लज्जेत कलया ॥ ६२ ॥

स्मित ज्योत्स्ना जालं तव वदन चन्द्रस्य पिबताम्
चकोराणाम् आसीत् अतिरसतया चञ्चुजडिमा ।
अतस्ते शीतांशोः अमृत लहरीं आम्लरुचयः
पिबन्ति स्वच्छन्दं निशि निशि भृशं काञ्जिकधिया ॥ ६३ ॥

अविश्रान्तं पत्युर् गुण गण कथाम्रेडनजपा
जपा पुष्पच्छाया तव जननि जिह्वा जयति सा ।
यदग्रासीनायाः स्फटिक दृषदच्छच्छविमयी
सरस्वत्या मूर्तिः परिणमिति माणिक्य वपुषा ॥ ६४ ॥

रणे जित्वा दैत्यान् अपहृत शिरस्त्रैः कवचिभिः
निवृत्तैः चण्डांश त्रिपुर हर निर्माल्य विमुखैः ।
विशाखेन्द्रोपेन्द्रैः शशि विशद कर्पूर शकला
विलीयन्ते मातस्तव वदन ताम्बूल कबलाः ॥ ६५ ॥

विपञ्च्या गायन्ती विविधमपदानं पशुपतेः
त्वयारब्धे वक्तुं चलित शिरसा साधु वचने।
तदीयैर् माधुर्यैर् अपलपित तन्त्री कलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतम्॥ ६६॥

कराग्रेण स्पृष्टं तुहिन गिरिणा वत्सलतया
गिरीशेन उदस्तं मुहुः अधरपानाकुल तया।
करग्राह्यं शंभोः मुख मुकुर वृन्तं गिरिसुते
कथंकारं ब्रूमः तव चिबुकं औपम्य रहितम्॥ ६७॥

भुजाश्लेषान् नित्यं पुरदमयितुः कण्ठकवती
तव ग्रीवा धत्ते मुख कमल नाल श्रियं इयम्।
स्वतः श्वेता कालागुरु बहुल जम्बाल मलिना
मृणालीलालित्यं वहति यदधो हार लतिका॥ ६८॥

गले रेखास्तिस्रो गति गमक गीतैक निपुणे
विवाह व्यानद्ध प्रगुण गुण संख्या प्रतिभुवः।
विराजन्ते नानाविध मधुर रागा करभुवां
त्रयाणां ग्रामाणां स्थिति नियम सीमान इव ते॥ ६९॥

मृणाली मृद्वीनां तव भुज लतानां चतसृणाम्
चतुर्भिः सौन्दर्यं सरसिज भवः स्तौति वदनैः।
नखेभ्यः सन्द्रस्यन् प्रथम मथनात् अन्धकरिपोः
चतुर्णां शीर्षाणां समं अभय हस्ता ऽ र्पणधिया॥ ७०॥

नखानां उद्योतैः नव नलिन रागं विहसताम्
कराणां ते कान्तिं कथय कथयामः कथमुमे।
कयाचिद्वा साम्यं भजतु कलया हन्त कमलम्
यदि क्रीडल् लक्ष्मी चरण तल लाक्षारस चणम्॥ ७१॥

समं देवि स्कन्दद्विप वदन पीतं स्तन युगं
तवेदं नः खेदं हरतु सततं प्रस्नुत मुखम्।

यदालोक्य आशङ्काकुलित हृदयो हास जनकः
स्वकुंभौ हेरंबः परिमृशति हस्तेन झडिति॥ ७२॥

अमू ते वक्षोजौ अमृत रस माणिक्य कुतुपौ
न संदेह स्पन्दो नगपति पताके मनसि नः।
पिबन्तौ तौ यस्मात् अविदित वधूसङ्ग रसिकौ
कुमारावद्यापि द्विरद वदन क्रौञ्च दलनौ॥ ७३॥

वहत्यम्ब स्तम्बेर मदनुज कुंभ प्रकृतिभिः
समारब्धां मुक्ता मणिभिः अमलां हार लतिकाम्।
कुचाभोगो बिम्बाधर रुचिभिः अन्तः शबलिताम्
प्रतापव्यामिश्रां पुरदमयितुः कीर्तिं इव ते॥ ७४॥

तव स्तन्यं मन्ये धरणिधर कन्ये हृदयतः
पयः पारावारः परिवहति सारस्वतं इव।
दयावत्या दत्तं द्रविड शिशुः आस्वाद्य तव यत्
कवीनां प्रौढानामजनि कमनीयः कवयिता॥ ७५॥

हर क्रोध ज्वाल वलिभिः अवलीढेन वपुषा
गभीरे ते नाभी सरसि कृतसङ्गो मनसिजः।
समुत्तस्थौ तस्मात् अचल तनये धूम लतिका
जनस्तां जानीते तव जननि रोमावलिरिति॥ ७६॥

यदेतत् कालिन्दी तनुतर तरङ्गाकृति शिवे
कृशे मध्ये किञ्चिज् जननि तव यद्भाति सुधियाम्।
विमर्दात् अन्यो ऽ न्यं कुच कलशयोः अन्तरगतं
तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीम्॥ ७७॥

स्थिरो गङ्गावर्तः स्तन मुकुल रोमावलि लता
कलावालं कुण्डं कुसुमशर तेजोहुत भुजः।
रतेर् लीलागारं किमपि तव नाभिर् गिरिसुते
बिलद्वारं सिद्धेः गिरिश नयनानां विजयते॥ ७८॥

निसर्ग क्षीणस्य स्तन तट भरेण क्लमजुषो
नमन् मूर्तेः नारी तिलक शनकैः त्रुट्यत इव ।
चिरं ते मध्यस्य त्रुटित तटिनी तीर तरुणा
समावस्थास्थेम्नो भवतु कुशलं शैल तनये ॥ ७९ ॥

कुचौ सद्यः स्विद्यत् तट घटित कूर्पासभिदुरौ
कषन्तौ दोर्मूले कनक कलशाभौ कलयता ।
तव त्रातुं भङ्गात् अलमिति वलग्नं तनुभुवा
त्रिधा नद्धं देवि त्रिवलि लवली वल्लिभिरिव ॥ ८० ॥

गुरुत्वं विस्तारं क्षितिधर पतिः पार्वती निजात्
नितंबात् आच्छिद्य त्वयि हरण रूपेण निदधे ।
अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतीम्
नितंब प्राग्भारः स्थगयति लघुत्वं नयति च ॥ ८१ ॥

करीन्द्राणां शुण्डान् कनक कदली काण्ड पटलीम्
उभाभ्यां ऊरुभ्यां उभयमपि निर्जित्य भवती ।
सुवृत्ताभ्यां पत्युः प्रणति कठिनाभ्यां गिरिसुते
विधिज्ञे जानुभ्यां विबुध करिकुंभ द्वयमसि ॥ ८२ ॥

पराजेतुं रुद्रं द्विगुण शरगर्भौ गिरिसुते
निषङ्गौ जङ्घे ते विषम विशिखो बाढमकृत ।
यदग्रे दृश्यन्ते दश शरफलाः पाद युगली
नखाग्रच्छद्मानः सुर मकुट शाणैक निशिताः ॥ ८३ ॥

श्रुतीनां मूर्धानो दधति तव यौ शेखरतया
ममाप्येतौ मातः शिरसि दयया धेहि चरणौ ।
ययोः पाद्यं पाथः पशुपति जटाजूट तटिनी
ययोः लाक्षा लक्ष्मीः अरुण हरि चूडामणि रुचिः ॥ ८४ ॥

नमोवाकं ब्रूमो नयन रमणीयाय पदयोः
तवास्मै द्वन्द्वाय स्फुटरुचि रसालक्तक वते ।

असूयती अत्यन्तं यदभि हननाय स्पृहयते
पशूनां ईशानः प्रमद वन कङ्केलित रवे ॥ ८५ ॥

मृषा कृत्वा गोत्र स्खलनं अथ वैलक्ष्य नमितम्
ललाटे भर्तारं चरण कमले ताडयति ते ।
चिरादन्तः शल्यं दहन कृतं उन्मूलितवता
तुला कोटि क्वाणैः किलिकिलितं ईशान रिपुणा ॥ ८६ ॥

हिमानी हन्तव्यं हिमगिरि निवासैक चतुरौ
निशायां निद्राणां निशि चरम भागे च विशदौ ।
वरं लक्ष्मी पात्रं श्रियमति सृजन्तौ समयिनाम्
सरोजं त्वत् पादौ जननी जयतश् चित्रमिह किम् ॥ ८७ ॥

पदं ते कीर्तीनां प्रपदमपदं देवी विपदाम्
कथं नीतं सद्भिः कठिन कमठी कर्परतुलाम् ।
कथं वा बाहुभ्यां उपयमनकाले पुरभिदा
यदादाय न्यस्तं दृषदि दयमानेन मनसा ॥ ८८ ॥

नखैर् नाकस्त्रीणां कर कमल संकोच शशिभिः
तरूणां दिव्यानां हसत इव ते चण्डि चरणौ ।
फलानि स्वः स्थेभ्यः किसलय कराग्रेण ददताम्
दरिद्रेभ्यो भद्रां श्रियं अनिशमह्नाय ददतौ ॥ ८९ ॥

ददाने दीनेभ्यः श्रियं अनिशं आशानु सदृशीम्
अमन्दं सौन्दर्य प्रकर मकरन्दं विकिरति ।
तवास्मिन् मन्दार स्तबक सुभगे यातु चरणे
मिनज्जन् मज्जीवः करण चरणः षट्चरणताम् ॥ ९० ॥

पद न्यास क्रीडा परिचयं इवारब्धु मनसः
स्खलन्तस्ते खेलं भवन कलहंसा न जहति ।
अतस्तेषां शिक्षां सुभग मणि मञ्जीर रणित
च्छलात् आचक्षाणं चरण कमलं चारु चरिते ॥ ९१ ॥

गतास्ते मञ्चत्वं द्रुहिण हरि रुद्रेश्वर भृतः
शिवः स्वच्छच्छाया घटित कपट प्रच्छदपटः।
त्वदीयानां भासां प्रतिफलन रागारुण तया
शरीरी श्रृङ्गारो रस इव दृशां दोग्धि कुतुकम्॥ ९२॥

अराला केशेषु प्रकृति सरला मन्द हसिते
शिरीषाभा चित्ते दृषदुपल शोभा कुच तटे।
भृशं तन्वी मध्ये पृथुरुरसि जारोह विषये
जगत् त्रातुं शंभोर् जयति करुणा काचिदरुणा॥ ९३॥

कलङ्कः कस्तूरी रजनिकर बिम्बं जलमयम्
कलाभिः कर्पूरैर् मरकत करण्डं निबिडितम्।
अतस् त्वद् भोगेन प्रतिदिनं इदं रिक्त कुहरम्
विधिर् भूयो भूयो निबिडयति नूनं तव कृते॥ ९४॥

पुरारातेर् अन्तः पुरमसि ततस् त्वच् चरणयोः
सपर्या मर्यादा तरल करणानां असुलभा।
तथा ह्येते नीताः शतमख मुखाः सिद्धिमतुलाम्
तव द्वारोपान्तस्थितिभिः अणिमाद्याभिः अमराः॥ ९५॥

कलत्रं वैधात्रं कति कति भजन्ते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः।
महादेवं हित्वा तव सति सतीनामचरमे
कुचाभ्यां आसङ्गः कुरवकतरोरपि असुलभः॥ ९६॥

गिरामाहुर् देवीं द्रुहिण गृहिणीं आगम विदो
हरेः पत्नीं पद्मां हरसहचरीं अद्रि तनयाम्।
तुरीया कापि त्वं दुरधिगम निस्सीम महिमा
महामाया विश्वं भ्रमयसि परब्रह्म महिषि॥ ९७॥

कदा काले मातः कथय कलितालक्तक रसम्
पिबेयं विद्यार्थी तव चरण निर्णेजन जलम्।

प्रकृत्या मूकानामपि च कविता कारणतया
यदाधत्ते वाणी मुख कमल ताम्बूल रसताम्॥ ९८ ॥

सरस्वत्या लक्ष्म्या विधि हरि सपत्नो विहरते
रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा ।
चिरं जीवन्नेव क्षपित पशु पाश व्यतिकरः
परानन्दाभिख्यं रसयति रसं त्वद् भजनवान्॥ ९९॥

प्रदीप ज्वालाभिर् दिवस कर नीराजन विधिः
सुधा सूतेश् चन्द्रो पलजललवैर् अर्घ्य रचना ।
स्वकीयैर् अंभोभिः सलिल निधि सौहित्य करणम्
त्वदीयाभिर् वाग्भिस् तव जननि वाचां स्तुतिरियम्॥ १०० ॥

समानीतः पद्भ्यां मणि मुकुरतां अम्बर मणिः
भयादन्तः स्तिमित किरण श्रेणि मसृणः ।
दधाति त्वद् वक्त्रं प्रतिफलन मश्रान्त विकचम्
निरातङ्कं चन्द्रान् निजहृदय पङ्केरुहं इव ॥ १०१ ॥

समुद्भूत स्थूल स्तन भर मुरश् चारु हसितं
कटाक्षे कन्दर्पः कतिचन कदम्बद्युति वपुः ।
हरस्य त्वद् भ्रान्तिं मनसि जनयां स्म विमला
भवत्या ये भक्ताः परिणति रमीषां इयं उमे ॥ १०२ ॥

निधे नित्यस्मेरे निरवधि गुणे नीति निपुणे
निराघातज्ञाने नियम परचित्तैक निलये ।
नियत्या निर्मुक्ते निखिल निगमान्त स्तुतिपदे
निरातङ्के नित्ये निगमय ममापि स्तुतिं इमाम्॥ १०३ ॥

॥ इति श्रीमत् शङ्कराचार्य विरचितं सौन्दर्य लहरी स्तोत्रं सम्पूर्णम्॥